# Shri Nimbarka Stotram

# શ્રીનિમ્બાર્કસ્તોત્રમ્

## Document Information

Text title : Shri Nimbarka Stotram 1

File name : nimbArkastotram1.itx

Category : deities_misc, gurudev, nimbArkAchArya, aShTaka

Location : doc_deities_misc

Author : audumbarAchArya

Proofread by : Mohan Chettoor

Description/comments : Shri Nimbarka Paddhati 1987 and Shri Sarveshwar Stotra Mala

Latest update : January 7, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2023

*sanskritdocuments.org*

# શ્રીનિમ્બાર્કસ્તોત્રમ્

શ્રીમતે સર્વવિદ્યાનાં પ્રભવાય સુબ્રહ્મણે ।
પ્રાચાર્યાય મુનીન્દ્રાય નિમ્બાર્કાય નમોનમઃ ॥ ૧॥

નિમ્બાદિત્યાય દેવાય જગજ્જન્માદિકારિણે ।
સુદર્શનાવતારાય નમસ્તે ચક્રરૂપિણે ॥ ૨॥

નમઃ કલ્યાણરૂપાય નિર્દોષગુણશાલિને ।
પ્રજ્ઞાનઘનરૂપાય શુદ્ધસત્ત્વાય તે નમઃ ॥ ૩॥

સૂર્યકોટિપ્રકાશાય કોટીન્દુશીતલાય ચ ।
શેષાનિશ્ચિતતત્ત્વાય તત્ત્વરૂપાય તે નમઃ ॥ ૪॥

વિદિતાય વિચિત્રાય નિયમાનન્દરૂપિણે ।
પ્રવર્ત્તકાય શાસ્ત્રાણાં નમસ્તે શાસ્ત્રયોનયે ॥ ૫॥

વસતાં નૈમિષારણ્યે મુનીનાં કાર્યકારિણે ।
તન્મધ્યે મુનિરૂપેણ વસતે પ્રભવે નમઃ ॥ ૬॥

લીલાં સમ્પશ્યતે નિત્યં કૃષ્ણસ્ય પરમાત્મનઃ ।
નિમ્બગ્રામનિવાસાય વિશ્વેશાય નમોનમઃ ॥ ૭॥

સ્થાપિતા યેન દ્વાર્વત્યાં તપ્તમુદ્રા કલૌ યુગે ।
નિમ્બાર્કાય નમસ્તસ્મૈ દુષ્કૃતામન્તકારિણે ॥ ૮॥

ય ઇદં પઠતે સ્તોત્રં નિમ્બાદિત્યસ્ય બુદ્ધિમાન્ ।
તસ્ય ક્વાપિ ભયં નાસ્તિ સૂર્યસ્ય તમસીવ તુ ॥ ૯॥

ઇતિ મહર્ષિવરશ્રીઔદુમ્બરાચાર્યપ્રણીતં શ્રીનિમ્બાર્કસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Mohan Chettoor

*Shri Nimbarka Stotram*

pdf was typeset on January 7, 2023

Please send corrections to *sanskrit@cheerful.com*